क्तावेदितव्याः । २ ब्राह्मणसदृशे क्षत्रियादौ भट्टदैवज्ञादौ च "अब्राह्मणादध्ययनमापत्काले विधीयते । अनुव्रज्या च शुश्रूषा यावदध्ययनं गुरोः" मनुः । भेदे न०त० । ३ ब्राह्मणभिन्ने शूद्रादौ च "नैतदब्राह्मणोवक्तुमर्हति समिधमाहर उप त्वा नेष्ये" इति छा०उ० ।

**अब्रूकृत** न० न ब्रुवे कृतम् । १ कथनाय प्रतिरोधके सनिष्ठीवे अब्रूकृते "अब्रूकृतमाह नद्वं दुष्टम् इति श्रुतिः ।

**अब्लिङ्ग** त्रि० अपां लिङ्गं बोधनसामर्थ्यं यत्र । जलरूपार्थ प्रकाशसामर्थ्ययुक्ते य० पठिते ११,५०'५१,५२ अपोहिष्ठा इत्यादिके तृचे अब्दैवते मन्त्रे "कस्य नूनमित्यादि" पञ्चदशर्च्चात्मके च तत्र ऋ० १ मण्डले चतुर्विंशम् सूक्तम् ।

**अभक्त** त्रि० भज—सेवायां विभागे च कर्त्तरि कर्म्मणि वा क्त न०त० । १ असेवके । "भक्तमभक्तमवोव्यन्तः" इति ऋ० १, १२७,५ । २ अपृथक्कृते च । [हीने त्रि० ।

**अभक्ति** स्त्री अभावे न०त० । १ भक्त्यभावे । न०ब० । २ भक्ति-

**अभक्षण** न० अभावे न०त० । १ भक्षणाभावे २ भक्षणनिवृत्तौ च । "पौर्णमास्यन्तमाघे च मूलकानामभक्षणमिति" म०त० ।

**अभक्ष्य** त्रि० भक्षितुमयोग्यं स्मृतिनिषिद्धत्वात् । १ स्मृतिनिषिद्धभक्षणे लशुनादौ अभक्ष्यत्वञ्च वस्तुस्वभावकृतं, कालकृतं, देशादिनिमित्तकृतं, द्रव्यान्तरयोगकृतं, स्वामिविशेषकृतं, चण्डालादिस्पर्शदर्शनादिदोषकृतम्, पात्रविशेषपाकादिकृतम्, अधिकारिविशेषकृतञ्चेति तत्तदुपाधिकृतम्, तत्र केषाञ्चित् नञादिना केषाञ्चिच्च तत्तद्भक्षणे प्रायश्चित्तोपदेशेना भक्ष्यत्वं स्मृत्यादावुक्तम् । अभक्ष्याणि च श्रुत्यादौ दर्शितानि "न कलञ्जं भक्षयेन्न लशुनं न पलाण्डुमिति श्रुतिः "लशुनं गृञ्जनं चैव पलाण्डुं कवकानि च अभक्ष्याणि द्विजातीनाममेध्यप्रभवानि च" मनुः । । कवकानि छत्राकाः अमेध्यप्रभवानि विष्ठादिजातानि । पलाण्डुसदृशं यत्त तु गन्धवर्णरसादिभिः । अभोज्यं तद्भवेत् सर्वमिति "लशुनादिषु ये तुल्या गन्धवर्णरसादिभिः । अभक्ष्यास्ते द्विजातीनाम्" इति च देव० । "लशुनपलाण्डुगृञ्जनकरञ्जकिंपाकगम्भीभक्षणे द्वादशरात्रं पयः पिबेत्" शङ्खः "लोहितान् वृक्षनिर्यासान् व्रश्चनप्रभवांस्तथा । शेलुं गव्यञ्च पेयूषं प्रयत्नेन विवर्ज्जयेत्" मनुः शेलुं बहुवारफलं गोसम्बन्धि पेयूषं नवप्रसूतायाः गोः अग्निसंयोगात् कठिनीभूतं क्षीरम् । "वृथाकृशरसंयावं पायसापूपमेव च अनुपाकृतमांसानि देवान्नापि हवींषि च" मनुः । वृथा देवताद्युद्देशेन आत्मार्थं यत् पच्यते तत् । "तिलतण्डुलसंपक्कः कृशरः सोऽभिधीयते" इति छा०प० उक्तः कृशरः, संयावः घृतक्षीरगुडगोधूमचूर्णमयः पिष्टकभेदः । अनुपाकृतानि मन्त्रैरसंस्कृतपशुमांसानि । देवान्नानि देवार्थं कल्पितानि प्राक् होमात् नाद्यानि । "वृथामांसञ्च नाश्नीयात् पितृदेवादिवर्जितम्" स्मृतिः "न तदश्नीयाद्यद्देवपितृमनुष्यार्थन्न कुर्य्यात्" शङ्खलि० । "वृथा मांसं न भोक्तव्यं भोक्तव्यं श्राद्धकर्मणि अन्यथा भक्षयन् विप्रः प्राजापत्यं समाचरेत्" छाग० । अस्यापवादः "भक्षयन्नपि मांसानि शेषभोजी न दुष्यति औषधार्थमशक्तौ वा नियोगात् यज्ञकारणात्" देवलः, "रोगी नियुक्तो-विधिना हुतं विप्रमतं तथा । मांसमद्याच्चतुर्द्धैषा परिसंख्या प्रकीर्त्तिता" वृह० । मनुरपि "क्रीत्वा स्वयं वाप्युत्पाद्य परोपकृतमेव वा अर्चयित्वा पितॄन् देवान् खादन्मांसं न दुष्यति" अन्यत्र दोषमाह स एव "अतोऽन्यथा तु योऽश्नीयात् विधिं हित्वा पिशाचवत् । यावन्ति पशुरोमाणि तावत् प्राप्नोति सान्वयम् । प्रोक्षितं भक्षयेन्मांसं ब्राह्मणानाञ्च काम्यया यथाविधि नियुक्तन्तु प्राणानामेव चात्यये इति च मनुः । ब्रह्मणकाम्यया तु सकृदेव भक्ष्यम् "भक्षयेत् प्रोक्षितं मांसं सकृद् ब्राह्मणकाम्यया दैवे नियुक्तं श्राद्धे वा नियमे तु विवर्जयेदिति" यमोक्तेः नियमः मांसभोजननिवृत्तिसंकल्पः स च व्रतभेदः । "मांसं नाश्नीयात् तद्व्रतम् संवत्सरं वेति" छा० उप० इत्यादिकः । अतएव विहित मांसविवर्जने एव मनुना फलाधिक्यं दर्शितम् "यो बन्धन बधक्लेशान् प्राणिनां न चिकीर्षति स सर्वस्य हितप्रेप्सुः सुखमत्यन्तमश्नुते । यद्ध्यायति यत्कुरुते धृतिं वा याति यत्र च । तदवाप्नोत्ययत्नेन यो हिनस्ति न किञ्चन" इति वर्षे वर्षेऽश्वमेधेन यो यजेत शतं समाः । मांसानि च न खादेद्यस्तयोः पुण्यफलं समम् ॥ फलमूलाशनैर्मेध्यैर्मुन्यन्नानाञ्च भोजनैः न तत् फलमवाप्नोति यन्मांस परिवर्जनात्" । अतएव मनुना न मांसभक्षणे दोषो न मद्ये न च मैथुने प्रवृत्तिरेषा भूतानां निवृत्तिस्तु महाफला" इत्यनिषिद्धमांसवर्ज्जनस्य महाफलतोक्ता । मांसभक्षणे न दोषइत्यादिकं तु दैवादिकर्म्मादौ अनुज्ञातमांसादिदोषाभावपरम् न तु निन्दितमांसभोजनेऽपि दोषाभावपरं तस्य स्वेनैव दुष्टत्वाभिधानात् तथा च स्वोक्तविहितमांसभक्षणे "सौत्रामण्यां सुरां पिबेदिति" श्रुत्युक्ते मद्यपाने, "न काञ्चन परिहरेत्तद्व्रतमित्यादि" श्रुत्युक्ते मैथुने च न दोषः । तेषामेव त्यागे महाफलत्वम् । अत